G.RUKMANI,
RESEARCH SCHOLAR,
RAJAH'S COLLEGE,
THIRUVAIYARU

# काव्यस्य आत्मा ध्वनिः

**उपोद्घातः**

संस्कृतभाषायाः साहित्यं गुरुतमम् । साहित्यशास्त्रं शास्त्रान्तराणि इव परमोपादेयं शास्त्रम् । न कस्या अपि भाषायाः साहित्यं अद्यापि तज्जेतुं पारयति । अन्यस्याः भाषायाः ग्रन्थाः संख्यायां वा शब्दावलिर्गणनायां विशालतरा स्यात् । अस्या भाषायाः सन्निधौ विद्यमानाः ग्रन्थाः स्वसारशालितया इतरभाषाणां ग्रन्थान् सलीलं पराभवन्ति । एतदीयायां शब्दावल्यामपि यद् व्यापकत्वं यद् गम्भीरत्वं यद् भिन्नार्थकत्वं , यत्प्रकृष्टत्वं , यन्निशितत्वं , यन्माधुर्यं , यत् प्रसादत्वं यत् ओजस्त्वं यत्सूक्ष्मत्वं , यच्च कामधुक्त्वं , विद्योतते न तत् कस्यापि भाषायाः शब्दश्रेणीषु सन्निहितमस्ति ।

साहित्यं वैदिक लौकिकभेदेन द्विविधम् । वैदिके साहित्ये संहिता - षडङ्ग- ब्राह्मणारण्यक उपनिषदादय अन्तर्भवन्ति । लौकिके दर्शनपुराण - रामायण- महाभारत - काव्यादीनि अन्तर्गताः भवन्ति ।

रामायण – महाभारत – काव्य – नीति – नाटकाख्यायिकादीनाञ्च उद्देश्यं प्रवृत्तितो निवृततिरपि जनसाधारणस्यापि आकर्षणं अस्ति । संस्कृतभाषायाः निर्दिष्टं साहित्यं सकलमपि संस्कृतभाषायाः गरिमाणं व्यापकतां सर्वाङ्गीणताञ्च अस्मत् पुरत उपस्थापयति ।

शब्दार्थशरीरं तावत् काव्यं भवति । शरीरे सति आत्मा कः ? इति प्रश्नस्य उत्तरं काव्यस्यात्मा ध्वनिरेव इति स्वमतं प्रकटीकरोति ध्वन्यालोकग्रन्थरचयिता आनन्दवर्धनाचार्यः ।

**काव्यस्य आत्मा ध्वनिः इति प्रतिज्ञा**

ध्वन्यालोककृद्भिः आनन्दवर्धनाचार्यैः काव्येषु आत्मत्वेन मुख्यप्राणत्वेन कश्चन अंशः वर्तते । तस्यैव ध्वनिरिति नाम भवतीति मनसिकृत्वा पीर्वं काव्यस्यात्मा ध्वनिरिति प्रतिज्ञातम् । ततश्च एतद्ध्वनिविषये बहवः विवादाः ध्वनेः अभाववादत्वरूपेण , धवनेः भाक्तत्वरूपेण, ध्वनेः वागविषयत्वरूपेण च ये वर्तन्ते तान् सर्वान् आक्षेपान्स्वयं कल्पयित्वा तस्य तस्य च खण्डन पुरस्सरं असन्दिग्धं उत्तरं विलिख्यध्वनेः स्वरूपं

सहृदयमनः प्रतीयते ब्रूमः इत प्रतिज्ञातम् । अनन्तरं ध्वनेः सत्तां निरूप्य काव्यस्य सहृदयश्लाघ्यः योऽर्थः काव्यरूपेण व्यवस्थितः सः वाच्यः प्रतियमान इति द्वेधा वर्तते इत्युक्तम् ।

एवमेव वाच्यप्रकारात् अत्यन्तं भिन्नः प्रतीयमानप्रकाराः सम्भवन्तीति निरूप्य वाच्यात् व्यङ्ग्यरूपेण वस्तु प्रतीयते , वाच्यात् अलङ्कारमपि व्यङ्ग्यरूपेण प्रतीयते । एवं अत्यन्तं वाच्याद्भिन्नः रसः व्यङ्ग्यत्वेन वाच्यसामर्थ्य आक्षिप्तः प्रकाशते इति निरूपितम् । स च प्रतीयमानोऽर्थः सहैव प्रतीयते ।

**शोकः श्लोकत्वं आगतः**

यथा प्रतिज्ञातं वस्तुनः वस्त्वन्तरप्रतीतिः इतिवत् वस्तुनो रसप्रतीतिः इति यद्वै विव्रियते तस्य उदाहरणत्वेन प्राचीनकविनां वाल्मीकिव्यासादीनां ग्रन्थेभ्यः श्लोकान् संगृह्य, तत्र प्रथमं वाल्मीकिरामायणे वाच्यात् रसध्वनिः कथं वा प्रतीयते इत्युदाहर्तुं पीठिकारूपेण

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा । क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥ इति ।**

अस्याश्च कारिकायाः अयमभिप्रायः । महाकवेः वाल्मीकेः यत् महाकाव्यं रामायणं वर्तते तस्य काव्यस्य क्रौञ्चद्वन्द्ववियोगोत्थः यः श्लोकः वर्तते तद्विभावकत्वेन यो रसः करुणः प्रतीयते स एव करुणः रामायणमात्मकमहाकाव्यस्य प्रधानो रसः इति । अस्य चोदाहरणम् –

**मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः । यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥**

अत्र च क्रौञ्चद्वन्द्वयोः अन्यतरस्य मरणात् तच्च व्याधकृतं मारणं इति ज्ञात्वा क्रौञ्चाः करुणरोधनञ्च श्रुत्वा महाकवेः हृदये शोको जातः । ततश्च एतस्मात् वाच्यार्थात् अन्यः शोकस्थायिभावकः करुणो रसः सहृदयचेतनस्सु अवश्यं प्रतियत एवेति स एव (करुण रस) आदिकवेः महाकाव्यस्य आत्मा इति वर्णयित्वा कावेयस्यात्मा ध्वनिरिति यदि पूर्वं प्रतिज्ञातं तत् अनया कारिकया उपसंहृतम् ।

**ध्वन्यभाववादिनां मतखण्डनम्**

आचार्यैः आनन्दवर्धनैः काव्यस्यात्मा ध्वनिरिति प्रतिज्ञातम् । अयं ध्वनिशब्दः नूतनः पूर्वैः लक्षणकृद्भिः न प्रस्तुतः । अतः अस्य प्रकारस्य सत्तायाः विषये विमति प्रकटयन्तः केचन ध्वविरिति नास्त्येव इत्यब्रुवन् । तथा हि पूर्वैः आचार्यैः अलङ्कारप्रस्थानं रीतिप्रस्थानं , वृत्तिप्रस्थानमिति यानि यानि प्रसिद्धानि प्रस्थानानि

वर्तन्ते तेभ्यः अत्यन्तं भिन्नत्वे अस्य प्रस्थानस्य अश्रुतपूर्वत्वात् तादृशस्य ग्रन्थस्य काव्यत्वस्यैव हानिः सम्भवेत्। कुत इति चेत् काव्यलक्षणस्य प्रस्तावनवेलायां सहृदयहृदयाह्लादि शब्दार्थान्तर्गतत्वात् लक्षणलक्षितत्वं न सङ्गच्छत इति भवदुक्तप्रकारक काव्यस्य काव्यत्मेव न स्यात् । केचन स्वकीयां कांश्चित् संयोज्य ध्वनि ध्वनिरिति उद्घोष्य ध्वनित्वं स्थापितवन्तः एतत्तु विद्वन्माननीयं न भवतीति ध्वनेरस्तित्वमेव केचन निराकुर्वन् । तत्र ये ध्वनि नास्त्येव इत्यब्रुवन् ते ध्वन्यभाववादिनः इति कथ्यन्ते । ध्वनेरभावं ते त्रेधा प्रतिपादयन्ति । केचन ध्वनेरस्तित्वं निराकुर्वन्ति । अन्ये भाक्तत्वं वदन्ति ।

अन्ये केचन ध्वनेरभावं अन्यथा प्रत्यपादयन् । तथाहि अर्थवैचित्र्येषु अर्थसौन्दर्यप्रतिपादकाः चारुत्वहेतवः बहवः अलङ्काराः कविभिः संसूचिताः वर्तन्ते ।काव्ये यत्सुन्दरं स एव ध्वनिरिति खलु । अतः तादृशं सौन्दर्यं प्राप्तवत्सु केषुचित् अलङ्कारेषु अस्य अन्तर्भावं अङ्गीकुर्मः । एतावतैव इष्टसिद्धेः 'ध्वनिरिति' बृहन्नामान्तरकरणे किमस्ति औचित्यम्। महाकविभिः बहवो अलङ्काराः प्रकाशिताः प्रकाश्यन्ते च । तेषु यस्मिन् कस्मिन् वा अलङ्कारे एनं ध्वनि अन्तर्भावयामः । अतः अस्य पृथक्सत्ता मास्तु ।

अन्ये केचन काव्ये सहृदयहृदयाह्लादकं वस्तु यत्किमपि वर्तते इत्यङ्गीकृत्य तस्यैव प्राधान्यं दातुं असहमानाः तस्य भाक्तत्वं अङ्गीकुर्वन्ति । भाक्तत्वं नाम गुणवृत्तिः । एतन्मते ध्वनेः प्राधान्यं सर्वप्रकारेण अवश्यकता च न निरूपिता ।

अपरे केचन तत् तत्वं गिरामगोचरं , सहृदयहृदयैक संवेद्यम् । अतः वृत्तिविशेष विशिष्टस्य मनसः यथा वा नीरूपवत्वं तद्वत् ध्वने लक्षणं वक्तुं अशक्यमेव । यस्य लक्षणं नास्ति तस्य सत्ता कथं वा अङ्गीक्रियेत । एवं च बहुभिर्प्रकारैः ध्वनेः अभाव एवं दृढीकृतो भवतीति चेत् –

**मैवम्** –

तथाहि ध्वनेः सत्ताविषये पूर्वपक्षिभिः ये वादाः उद्भाविताः तेषां निर्मूलत्वं ध्वने सत्तायाः समूलत्वञ्च यथाशक्ति वर्ण्यते।ध्वनेः स्वरूपं तावत् सकलसत्कविकाव्य उपनिषद्भूतं अतीव रमणीयम् । सूक्ष्ममतीनां कवीनां मतिभिरपि अनुन्मीलितपूर्वं वर्तते । एतस्य स्वरूपं तु रामायणमहाभारतादि ग्रन्थेषु सर्वत्र सहृदयहृदयगोचरं वर्तते । अतः तस्य अभावः सर्वथा निरूपयितुमशक्यः इति तस्य स्वरूपं आनन्दवर्धनाचार्यैः एवं वर्णितं वर्तते ।

**उपसंहारः**

शरीरस्य आत्मा इव काव्यस्य साररूपतया स्थितः सहृदयहृदयश्लाघ्यः कश्चन अर्थो वर्तते । स च अर्थः वाच्यः प्रतीयमान इति द्वेधा विभक्तः भवति। उपमाद्यलङ्कारै युक्तः वाच्यो भवति । अङ्गनासु

लावण्यमिव अवयवातिरिक्त कश्चन प्रतीयमानः इति अर्थः वर्तते । वाच्यार्थात् सर्वथा भिन्नैव प्रतीयमानः अर्थः भवति ।

**भ्रम धार्मिक विस्रब्धः स शुनकोऽद्य मारितस्तेन । गोदावरी नदीकूललतागहनवासिना दृप्तसिंहेन ।**

इत्यत्र विधिरूपवाक्यार्थात् भिन्न निषेधरूप प्रतियमानोऽर्थः भवति ।

**श्वश्रूरत्र शेते अत्राहं दिवसकं प्रलोकय । मा पथिक रात्र्यन्धक शय्यायामावयोः शयिष्ठाः ।**

अत्र प्रतिषेधरूपात् वाच्यार्थात् भिन्न विधिरूपः प्रतीयमानार्थो भवति ।

**व्रज ममैवैकस्या भवन्तु निःश्वासरोदितव्यानि । मा तवापि तया विना दाक्षिण्यहतस्य जनिषत ॥**

इत्यत्र विधिरूपात् वाच्यार्थात् भिन्न अनुभयात्मकः प्रतीयमानः वाच्यार्थः भवति ।

**प्रार्थये तावत्प्रसीद निवर्तस्व मुखशशिज्योत्स्ना विलुप्तमोनिवहे ।**
**अभिसारिकाणां विघ्नं करोष्यन्यासामपि हताशे ।**

इत्यत्र वाच्यात् प्रतिषेरूपात् भिन्न अनुभयात्मकः प्रतीयमानोऽर्थः ज्ञायते । क्वचित् वस्तु वाच्यं चेत् प्रतीयमानोऽपि वस्तु भवति । एवं वस्तुना अलङ्कारः अलङ्कारेण वस्तु अलङ्कारात् अलङ्कारः इति अर्थाः प्रतियन्ते । ध्वनित्वेन स्वीकृतेषु वस्त्वलङ्काररसेषु तृतीयो रसः ध्वनित्वेन काव्येषु प्रतीयते । वाल्मीकिरामायणे आदिकविना वाल्मीकिना क्रौञ्चद्वन्द्ववियोगात् । शोकात् करुणरूपः यो रसः रामायणे स्थापितः स प्रतियमान एवेति सर्वैरङ्गीकृतमेव । अयं रसः काव्यार्थतत्त्वज्ञैरेव ज्ञायते । ते एव कालिदासादयः महाकवयः इति स्तूयन्ते। अयं प्रतीयमानोऽर्थः वाच्यार्थात् अभिव्यज्यते न तु जायते यथा दीपात् घटव्यक्तिः . वाच्यार्थविमुखात्मनां सचेतसां महाकवीनां बुद्धौ अयं प्रतियमानोऽर्थः झटित्यवभासते । अतः ध्वनिः अस्ति इति ध्वनि स्थापयित्वा अलङ्कारेषु ध्वन्यन्तर्गतत्त्वं खण्डयित्वा ध्वनेः स्वरूपं आचार्यैः एवं वर्णितम् ।

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनी कृतस्वार्थौ ।**
**व्यंक्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥ इति ।**

अतः काव्यस्य आत्मा ध्वनिरेव इति निरूपितं आचार्यैः शम् ॥

सहायकग्रन्थः 1. ध्वन्यालोकः